# 2018

## SANSKRIT – GENERAL

**Paper : GE/CC-1**

**Full Marks : 65**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

### Section - A

### Unit - I

1. (क) "रघूणाम् अन्वयं वक्ष्ये"– कीदृशः आसीत् 'रघूणाम् अन्वयः'— संक्षेपेण **संस्कृत भाषया देवनागरीलिप्या** च विव्रियताम्। 10

*अथवा*

(ख) (i) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥
—इत्यस्य श्लोकस्य सप्रसङ्गं व्याख्या **संस्कृतभाषया देवनागरीलिपिमाश्रित्य** कर्तव्या। 5

(ii) प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः
—अंशस्यास्य **देवभाषया देवनागरीलिप्या** च भावसम्प्रसारणं कार्यम्। 5

### Unit - II

2. संक्षेपेण यथामति ***पञ्च*** प्रश्नानाम् उत्तरं दीयताम् (**संस्कृतभाषया देवनागरीलिप्या** च) : 2×5

(क) मनीषिणां माननीयः कः?

(ख) दिलीपस्य राज्ञः शारीरिकवर्णनाप्रसङ्गे यानि विशेषणानि कविना प्रदत्तानि तेषु किमपि द्वयम् लिख्यताम्।

(ग) 'मेरुरिवात्मना'—इत्यत्र मेरुरिव कः विराजते? 'आत्मना' इति शब्दस्य अत्र कोऽर्थः?

(घ) राज्ञः दिलीपस्य करनीतिः कीदृशी आसीत्?

(ङ) राज्ञः दिलीपस्य अर्थसाधनद्वयं किमासीत्?

(च) ज्ञाने ____ क्षमा ____ –इत्यत्र रिक्तस्थानद्वयं पूरयितव्यम्।

(छ) 'स पिता पितरस्तासां केवलं जन्महेतवः'— स इति पदेन कोऽवबुध्यते? 'पितरस्तासाम्' —इत्यत्र सन्धिविच्छेदः कार्यः।

## Section - B

### Unit - I

3. (क) शिशुपालवधस्य प्रथमसर्गानुसारं वासुदेवसदने स्वर्गात् नारदस्य अवतरणं वर्ण्यताम्। 10

*अथवा*

(ख) 'माघे सन्ति त्रयो गुणाः' —इति वाक्यस्य तात्पर्यं व्याख्यायताम्। 10

### Unit - II

4. अधोलिखितेषु यथामति **पञ्चानाम्** उत्तरं **संस्कृतभाषया देवनागर्या लिप्या** च प्रदेयम्। 2×5

(क) शिशुपालवधकाव्यस्य प्रथमसर्गस्य नाम किम्? काव्यस्य टीकाकारः कः?

(ख) कथं श्रीकृष्णः 'पुण्डरीकाक्षः' —इति नाम्ना भूषितः?

(ग) कः यज्वानां प्रियः? कथं स प्रकामम् अप्रीयत?

(घ) 'बाडवजातवेदा' —इति पदस्य कोऽर्थः?

(ङ) जगतः आदिपुरुषः कः? मनीषिणः केषां गृहं गन्तुं नाभिलषन्ति?

(च) 'तदेकवर्णाविव तौ बभूवतुः' —इत्यत्र 'तौ' इति पदेन कौ अवबुध्येते?

(छ) नारदस्य वीणायाः नाम किम्? तस्य उपवीतं काभिः निर्मितम्?

## Section - C

### Unit - II

5. (क) निम्नप्रदत्तयोः कस्यापि **एकस्य** श्लोकस्य सप्रसङ्गं व्याख्या कार्या **संस्कृतभाषया देवनागरीलिप्या** च। 5

(i) येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरन्ति॥

(ii) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः॥

(ख) निम्नलिखितयोः यथेच्छं कस्यापि **एकस्य** भावसम्प्रसारणं कर्तव्यं सुरभाषया देवनागरीमाश्रित्य। 5

(i) वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि॥

(ii) क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥

## Section - D

## Unit - II

6. निम्नलिखितेषु किमपि विषय**त्रय**मवलम्ब्य संक्षिप्ता टीका लेखितव्या। 5×3

   (क) अश्वघोषस्य बुद्धचरितम्

   (ख) संस्कृतखण्डकाव्येषु मेघदूतस्य स्थानम्

   (ग) नैषधचरितम् तस्य कविश्च

   (घ) शतककाव्येषु शृङ्गारशतकस्य माहात्म्यम्

   (ङ) भारवेः कविकृतिः